। अर्हम् ।

विक्रमादित्यनृपालप्रतिबोधकेन वादिवृन्दारकवृन्दवारणपञ्चाननेन
कमनीयतमकविताकल्पवल्लीकल्पेन तुलनातीतकल्पना-
शिल्पिशिल्पिशेखरेण सूरिशेखरेण भगवता
श्रीसिद्धसेनदिवाकरेण प्रणीता—

द्वात्रिंशद् द्वात्रिंशिकाः ।

[तत्र तृतीया द्वात्रिंशिका]

तपोगच्छाधिपति शासनसम्राट् सर्वतन्त्रस्वतन्त्र-जगद्गुरुश्रीविजय-
नेमिसूरीश्वरपट्टालङ्कारेण व्याकरणवाचस्पति शास्त्रविशारद-कविरत्नेति-
पदालङ्कृतेन विजयलावण्यसूरिणा विरचिता—

किरणावली नाम विवृतिः ।

भक्त्या श्रीनेमिसूरेरधिगतविविधव्याकृतिप्रक्रियोऽथा
नेकग्रन्थार्थसारो जिनमतनिरतोऽधीतसिद्धान्तसार ।
सूरिर्लावण्यनामा स्वगुरुसफलवैकान्तमिच्छे तृतीये,
भागे द्वात्रिंशिकानां विवृतिमिह शुभां गूढसारे तनोति ॥ १ ॥

पुरुषोत्तमस्याऽचिन्त्यगुणतादात्म्यापन्नत्वादिधर्मवतो जिनस्य स्तुतिमारभते—

अनन्यपुरुषोत्तमस्य पुरुषोत्तमस्य क्षिता
वचिन्त्यगुणसात्मन प्रभवविक्रियानात्मन ।
प्रमादविजितस्मृतिर्गणयितुं मतिप्रोद्यम
स्तव किल विभुरस्मि पुरुहूतगीतात्मन ॥ १ ॥

[प्रथमी]—

अनन्यपुरुषोत्तमस्येति। "क्षितौ अनन्यपुरुषोत्तमस्य पुरुषोत्तमस्य अपि त्वद्गुणसाम्येन प्रभवविनिश्चयाप्रमेन पुरुहूतशक्तिलाभेन सर्वं मत्सरोऽस्मि गुणग्रामेषु प्रसादविज्ञितमूर्ति विश्वगुरुरसि जिन' इत्यन्वयः। क्षितौ पृथिव्याम्, अनन्यपुरुषोत्तमस्य अन्यश्चासौ वा पुरुषोत्तमोऽन्यपुरुषोत्तमः, न अन्यपुरुषोत्तमोऽनन्यपुरुषोत्तमस्तस्य, यद्वा न्यायाभिमतपुरुषोत्तमभिन्नस्य जीवभिन्नेश्वरस्य न्यपुरुषोत्तमभिन्नस्य वा 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ उत्तमः पुरुषस्त्वन्यः, परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥" [अ० १५ श्लो० १६,१७ १८]

इत्यादिगीतावचनेभ्योऽन्यपुरुषोत्तमस्वरूपावगतिर्भवति तत्र द्वाविमाविति श्लोकत्रयव्याख्यानं मधुसूदनस्येत्थम्—

एवं सोपाधिकमात्मानमुक्त्वा क्षराक्षरशब्दवाच्यकार्यकारणोपाधिद्वयवियोगेन निरुपाधिकं शुद्धमात्मानं प्रतिपादयति कृपया भगवानर्जुनाय त्रिभिः श्लोकैः— द्वाविमौ—पृथग्राशीकृतौ पुरुषौ—पुरुषोपाधित्वेन पुरुषशब्दव्यपदेश्यौ, लोके—संसारे, कौ तावित्याह—क्षरश्चाक्षर एव च, क्षरतीति क्षरो विनाशी कार्यराशिरेकः पुरुषः, न क्षरतीत्यक्षरो विनाशरहितः, क्षराख्यस्य पुरुषस्योत्पत्तिबीजं भगवतो मायाशक्तिर्द्वितीयः पुरुषः, तौ पुरुषौ व्याचष्टे स्वयमेव भगवान्—'क्षरः सर्वाणि भूतानि'—समस्तं कार्यजातमित्यर्थः, कूटस्थः—कूटो यथार्थवस्त्वाच्छादनेनायथार्थवस्तुप्रकाशनं वञ्चनं मायेत्यनर्थान्तरम् तदावरणविक्षेपशक्तिद्वयरूपेण स्थितः कूटस्थः, भगवान् मायाशक्तिरूपः कारणोपाधिः संसारबीजत्वेनानन्त्यादक्षर उच्यते, कश्चित्तु—क्षरशब्देनाचेतनवर्गमुक्त्वा 'कूटस्थोऽक्षर उच्यते' इत्यनेन जीवमात्रमाह तन्न सम्यक् क्षेत्रज्ञस्यैवेह पुरुषोत्तमत्वेन प्रतिपाद्यत्वात्, तस्मात् क्षराऽक्षरशब्दाभ्यां कार्यकारणोपाधी उभावपि जडावेवोच्येते इत्येवमुक्तम्॥ १६॥

आभ्यां क्षराऽक्षराभ्यां विलक्षणः क्षराऽक्षरोपाधिद्वयदोषेणास्पृष्टो नित्यशुद्धबुद्धमुक्तस्वभावः उत्तमः—उत्कृष्टतमः पुरुषस्त्वन्यः—अन्यः एवात्यन्तविलक्षणः, आभ्यां क्षराऽक्षराभ्यां जडवर्गाभ्यामुभयभासकस्तृतीयश्चेतनराशिरित्यर्थः, परमात्मेत्युदाहृतः—अन्नमयप्राणमयमनोमयविज्ञानमयाऽऽनन्दमयेभ्यः पञ्चभ्योऽविद्या-

कल्पितात्मनः परम-उत्कृष्टोऽकल्पितो "ब्रह्म पुच्छं प्रतिष्ठा" [तैत्ति २।५] इत्युक्त आत्मा च सर्वभूतानां प्रत्यक्चेतन इत्यतः परमात्मेत्युक्तो वेदान्तेषु य परमात्मा लोकत्रय-भूर्भुवःस्वराख्यं, सर्वं जगदिति यावत्, आविश्य-स्वकी यया मायाशक्त्याऽधिष्ठाय, बिभर्ति-सत्तास्फूर्तिप्रदानेन धारयति पोषयति च, कीदृश ? अव्यय-सर्वविकारशून्य ईश्वर-सर्वस्य नियन्ता नारायण, स उत्तम पुरुष परमात्मेत्युदाहृत इत्यन्वय, "स उत्तम पुरुष" [छां ८।१२।३] इति श्रुते ॥ १७ ॥

इदानीं यथाव्याख्यातेश्वरस्य क्षराऽक्षरविलक्षणस्य पुरुषोत्तम इत्येतत्प्रसिद्ध नामनिर्वचनेन ईदृशः परमेश्वरोऽहमवेत्यात्मानं दर्शयति भगवान् ब्रह्मणो हि प्रतिष्ठाह तद्धाम परमं मम' इत्यादिप्रागुक्तनिजमहिमनिर्धारणाय-यस्मात् क्षर-कायत्वेन विनाशिनं मायामयं ससारवृक्षमश्वत्थाख्यम्, अतीत अतिक्रान्त, अहं परमेश्वर अक्षरादपि-मायाख्यादव्याकृतात् 'अक्षरात् परत पर" इति पञ्चम्यन्ताक्षरपदेन श्रुत्या प्रतिपादितात् ससारवृक्षबीजभूतात् सर्वकारणादपि, चोत्तम-उत्कृष्टतम, अत क्षराक्षराभ्यां पुरुषोपाधिभ्यामध्यासेन पुरुषपदव्य पदेश्याभ्यामुत्तमत्वात्, अस्मि-भवामि, लोके वेदे च प्रथित-प्रख्यात, पुरुषो त्तम इति स उत्तम पुरुष इति वेदे उदाहृत एव, लोके च कविकाव्यादौ "हरिर्यथैक पुरुषोत्तम स्मृत' इत्यादि प्रसिद्धम्" इति ॥ १८ ॥

पुरुषोपाधित्वेन कल्पितपुरुषपदव्यपदेश्याभ्यां क्षराऽक्षराभ्यामुत्तमत्वेन पुरुषोत्तम इति पराभिमतो हरिरन्यपुरुषोत्तमो न वस्तुत पुरुषोत्तम इति तद न्योऽनन्यपुरुषोत्तमस्त्वमित्यर्थ पुरुषोत्तमस्य पुरुषेषु-जीवेषु केवलज्ञानादिमत्त्वे नोत्कृष्टस्य, कर्मावरणापगमानन्तर शुद्धबुद्धमुक्तत्वान्यप्यस्येति तद्रूपेणाप्यु त्कृष्टस्य अचिन्त्यगुणसात्मन अचिन्त्या-चिन्तयितुमशक्या गुणा अचिन्त्य गुणास्तै सात्मन-ऐक्यमापन्नस्य एव च अचिन्त्यगुणैक्यमापन्नस्याचिन्त्यत्वं सिद्धं भवति प्रभवनिर्क्रियावर्त्मन प्रभवा-जन्मपरंपरा, तेषां या निक्रिया-विरुद्धा क्रिया, दर्शनज्ञानचारित्रपरिशीलनमित्यर्थ, तस्या वर्त्मन-मार्गस्य, प्रवर्तकस्येत्यर्थ; पुरुहूतगीतात्मन पुरुहूत-पुरन्दर, तेन गीत-स्तुत आत्मा यस्य स पुरु-हूतगीतात्मा, तस्य; मतिप्रोद्गम मते-प्रतिभाया, प्रकर्षेणोद्गम-आविर्भावो यत्र तत् मतिप्रोद्गम स्तव तद्गुणगौरवोपवर्णनम्, गणयितुं भूय परावर्तयितुम्, प्रसादनिर्जितस्मृति भगवत प्रसादन-'अयमविचलिताशेषानुभूतविषयक स्मृतिमान् भवतु' इत्याकारकेच्छालक्षणेनेव भगवत्सांमुख्येन, विजिता-स्ववशी

स्थापिता स्वाधीनेति यावत्, स्मृति –स्मरणं यस्य स प्रसादविजितस्मृतिः, यदा यं गुणमुपादाय भगवन्तं स्तोतुमिच्छति तदा तद्गुणस्मृतिर्भगवत्प्रसादाद् भवत्येव, भगवत्प्रसादाभावे तु तद्गुणस्मरणाभावात् कथं तं गुणमुपादाय भगवत्स्तुति प्रोल्लसेदित्यभिसन्धि विवक्षु वक्तुमिच्छु, भगवतः स्तवनं तु स्वमहिम्नैव सुप्रतिष्ठित, केवलं स्ववचननिर्मलीकरणाय तद् वक्तुकामोऽहमित्याशय, असि अहं सिद्धसेनदिवाकर, किलेति सम्भावनायां, सम्भावयाम्यहमित्थम्, त्वद्वचनोद्गमस्तु त्वत्प्रसादैकरम्य इत्यर्थ ॥ "ज-सौ ज-स-य-ला वसु ग्रहयतिश्च पृथ्वी गुरु ।" इति लक्षणलक्षितत्वात् पृथ्वीवृत्तमिदम्, एवमग्रेऽपि ॥ १ ॥

हे वीर ! त्वदाश्रयणकृतादरा अनेकान्तवादिन एकान्तवादिभि शठैरपाकृता अपि सुखमध्यासत इति लोकानां त्वमेव शरणमसीत्याह—

व्यलीकपथनायकैर्हतपरिश्रमच्छद्मभि
निरागसि सुखोन्मुखे जगति यातनानिष्ठुरै ।
अहो ! चिरमपाकृता स्म शठवादिभिर्वादिभि-
स्त्वदाश्रयकृतादरास्तु वयमद्य वीर ! स्थिता ॥ २ ॥

व्यलीकपथनायकैरिति । 'हे वीर ' व्यलीकपथनायकैर्हतपरिश्रमच्छद्मभि-र्निरागसि सुखोन्मुखे जगति यातनानिष्ठुरै शठवादिभिर्वादिभि, चिरमपाकृता स्म वयम्, अद्य अहो त्वदाश्रयकृतादरास्तु स्थिता " इत्यन्वय ।व्यलीकपथनायकै व्यलीक अभीष्टप्राप्त्यजनकत्वाच्छशशृङ्गादिकल्प, पन्था-मुक्त्याद्युपायोपदर्शनमार्गो येषां ते एकान्तवादिनो व्यलीकपथास्तेषां नायका –तत्तद्दर्शनोपदेष्टारो व्यलीकपथनायका, तत्तद्दर्शनोपदिष्टपदार्थतत्त्वप्ररूपका अपि तथा, तैर्व्यलीकपथनायकै, हितपरिश्रमच्छद्मभि हिताय-पश्चादीनां स्वर्गादीष्टवस्तुप्रापणाय, परिश्रम –यज्ञोपवधादिकोऽस्माकं प्रयत्न, इति छद्म-माया येषां तान्तै, निरागसि अपराधरहिते सुखोन्मुखे सुखं मे भवत्विति कामनया सुखोपायान्वेषणप्रवणे जगति जगदन्तर्गतजन्तुपदार्थस्य सुखोन्मुखत्वाभावाज्जगत्पदमत्र चेतनमात्रपरमिति धीने, यातनानिष्ठुरै पीडाजनने दयालवरहितै, निष्करुणै, अत एव यज्ञादावनादिजीवघातपरायणै, शठवादिभि शठा –साधुजनद्वेषशालिनश्च–वादिनश्च–युक्तिहीनवचनलम्पटाश्च शठवादिनस्तै, वादिभि एकान्त

वादिभि , चिरं यावत् जिनमतपरिज्ञान तावत्कालम् , अपाकृता कुयुक्तिभिर्निराकृता स, यत्र जैना , अद्य जिनमतमुक्तनिरुद्धश्रद्धाकारे अहो आश्चर्य, त्वदाश्रयत्वाद्दरास्तु जिनाश्रयणकृतमक्तय पुन , यदेव जिनेनोक्त तदेव सत्यमित्येव नित्यं प्रति बहुमानेन जिनैकसेवानिरता , स्थिता परानभिभवनीय स्वस्वरूपव्यवस्थिता परैरेकान्तवादिभिश्चालयितुमशक्या इत्यर्थ ॥ २ ॥

हे जिन ! भवता यथा समारोऽस्मात् प्रज्ञ उपदर्शितस्तथैव स सत्तामव गम्यत, अन्योपवर्णितस्तु व्यलीक एवत्युपदर्शयति—

अनादिनिधन क्वचित् क्वचिदनादिरुच्छेदवान्
प्रतिस्वमविशेषजन्मनिधनादिवृत्त पुन ।
भवव्यसनपञ्जरोऽप्युदितमन्वया नो यथा
तथाऽप्यमभो भवश्च जिन ! गम्यते नान्यथा ॥ ३ ॥

अनादिनिधन इति । 'अयं भवव्यसनपञ्जर क्वचिदनादिनिधन क्वचिद नादिरुच्छेदवान् , पुन प्रतिस्वमविशेषजन्मनिधनादिवृत्त , हे जिन ! त्वया यथा न उदित तथा यमभवो भवश्च गम्यत, अन्यथा न' इत्यन्वय । अथ सर्वेषां प्रत्यक्षविषय कनाप्यपलपितुमशक्य , अनुभूयमानस्यापलापासम्भवात्; भव व्यसनपञ्जर भवति-उत्पद्यतेऽस्मिन् जीवोऽजीवश्चेति भव-ससार , स एव पुन पुनरुत्पादीयमानत्वाद् व्यसन, तदेव स्वान्तर्जीवावस्थानहेतुत्वाद् बहिर्निर्गमन रोधकत्वाच्च पञ्जर ; स कीदृश ? क्वचित् अनन्तससारे अभव्यजीवे, अनादि निधन आदिश्च निधन च आदिनिधन, न विद्येते आदि निधन यस्य सोऽनादि निधन आद्यन्तरहित इत्यर्थ क्वचिद् भव्यजीवविशेषे, अनादि आदिरहित प्रवाहत आदिरहित , पूर्वं समाराभाव पश्चादपि समारो न स्यादथ, उच्छेदवान् केवलज्ञानावाप्तौ कर्मोदकविगम सत्यत्यन्तमुच्छिद्यत ससार पर्व वैलक्षण्ये सत्यपि पुन प्रतिस्व प्रतिव्यक्ति, अविशेषेण मनिधनादिवृत्त अविशेषेण-सामान्येन, जन्मनिधनादिभि -उत्पत्ति मरणादिभि , वृत्त -पूर्ण , ससारपञ्जर गतानामन्यप्राणिनां प्रतिव्यक्ति जन्म मरणत्वमविशिष्ट भवत्येव, तदुक्तम्—

"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ १ ॥

परा तु अल्पायुषो न भवति, अतो न तस्या उपादानम्, अविरोधेन प्रतिव्यक्ति तस्या अप्रवृत्ते तत्र—

"जन्म जरा-मरणकृतं दुःख प्राप्नोति चेतन पुरुष ।
लिङ्गस्यापि निवृत्तेस्तस्माद् दुःखं स्वभावेन ॥ २ ॥

इति सांख्याचार्यवचन तु यस्य दृगायुषो न कस्यचिद् रोगादे सम्भवस्तस्यापि कारणान्तरजन्यदुःखाभावेऽपि जन्मादिजन्यं दुःख भवत्येवेत्येतदभिप्रायकम् । हे जिन ! ध्वंसरूपो भवव्यसनपञ्जरो न अस्माक, यथा येन प्रकारेण, त्वया केवलज्ञानिना जिनेन, उदित कथित , तथा तेन प्रकारेण, अय भवव्यसन पञ्जर अभव न विद्यत स्वाधिकरणक्षणध्वंसानधिकरणक्षणसम्बन्धरूपो भव – उत्पादो यस्य सोऽभव , प्रवाहतोऽनादित्वात् संसारस्य स्वाधिकरणक्षणध्वंसानधिकरणक्षण एव नास्तीति तत्सम्बन्धलक्षणभवोऽपि न विद्यते इति युक्त-अभव , भवश्च भवत्यस्मिन्निति भवश्च संसारो भवति, यतो जायन्त एवास्मिन् प्राणिन इति, गम्यते ज्ञायत, अन्यथा जिनोक्तप्रकारव्यतिरिक्तप्रकारेण, न न ज्ञायत, एकान्तरूपस्य तत्प्रकारस्य व्यलीकत्वेन तद्रूपेण संसारस्यापि व्यलीकत्वादित्यर्थ ॥ ३ ॥

जिनोक्तप्रकारेणैवाभ्युदयादिकं समीचीनं, तत्र प्रतिवादिनो मूकीभवनमेव न्याय्यम् अन्यथाऽङ्गीकृतैर तत्रापीत्याशयेनाह—

जगत्यनुनयन् यथाभ्युदय विक्रियावन्ति च
स्वतन्त्रगुणदोषसाम्यविषमाणि भोज्यान्यपि ।
क्रियाफलविचित्रता च नियता यथा भोगिना
तथा त्वमिदमुक्तवानिह यथा पर शेरते ॥ ४ ॥

जगतीति । जगति यथाऽनुनयन् भोज्यान्यपि अभ्युदय विक्रियावन्ति स्वतन्त्रगुण दोषसाम्यविषमाणि च भोगिना यथा च क्रियाफलविचित्रता नियता तथा त्वमिदमुक्तवान् यथा इह परे शेरत" इत्यन्वय । हे भगवन् ! जगति संसारे, यथा येन प्रकारेण, अनुनयन् भक्तशिष्य प्रति यादान् स्वोपदर्शितमार्गानुसारिणो विदधत्, भोज्यान्यपि स्वकृतकर्मफलात्मकभोज्यान्यपि, अभ्युदय विक्रियावन्ति अभ्युदय –स्वर्गादि धन पुत्र समृद्ध्यादि च, विक्रिया-नरकादि

दारिद्र्यादि च, तदन्यतरवन्ति, विहितानुष्ठानेनाभ्युदयवन्ति निषिद्धाचरणेन विनिपातवन्ति, च पुनः, स्वतन्त्रगुण-दोषसाम्य विषमाणि स्वतन्त्रौ-ईश्वर-प्रेरणानपेक्षौ स्वाभाविकाविति यावत्, एतेन—

अज्ञो जन्तुरनीशोऽयमात्मनः सुख-दुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥ १ ॥

इत्यादेरपाकृतिः यौ गुण-दोषौ—भोज्यगतौ भोग्यकारणमात्रजनितौ गुण-दोषौ, तयोः साम्य विषमाणि—कानिचिद् भोज्यानि स्वतन्त्रगुण दोषसाम्यानुगतानि कानिचित् स्वतन्त्रगुण दोषवैषम्यानुगतानि भोगिना कर्मफल भोक्तॄणां पुरुषाणाम्, यथा च येन प्रकारेण च क्रियाफलविचित्रा अस्याः क्रियाया इदं फलम्, एतस्याश्चेदमित्येवं क्रियाफलवैचित्र्यम्, नियता येन पुरुषेण या क्रिया कृता तस्यैव पुंसस्तस्याः क्रियायाः फलं भवति नान्यस्येत्येवं नियता, तथा तेन प्रकारेण, त्वं केवली स्वयम्, इदं भोग्यक्रियाफलवैचित्र्यादिकम्, उक्तवान् कथितवान् यथा इह अस्मिन् विषये, परे एकान्तवादिनः, शेरते एतत्प्रति पक्षप्रकारस्य युक्तस्यास्फुरणेनैतत्खण्डनाशक्त्वान्मूर्छीभवनमत्रास्त्यायमित्या लोच्य सुप्ता इव भवन्तीत्यर्थः ॥ ४ ॥

हे भगवन्! भवदुपदिष्टोऽपि स्वभावतो मोक्षसुखावाप्तिफलक उत्कृष्टो मार्गोऽयथावदनुसृतो न हितावह किन्तु निष्प्रत्युत्थित एवेत्युपदर्शयति—

अतीत्य नियतव्यथौ स्थितिविनाशमिथ्यापथौ
निसर्गशिवमात्थ मार्गमुदयाय य मध्यमम् ।
स एव दुरतिष्ठितोऽयमभिधानरूक्षाशया-
न्मधाविव महोरगो दशति दुर्गृहीतोद्धत ॥ ५ ॥

अतीत्येति । "नियतव्यथौ स्थितिविनाशमिथ्यापथौ अतीत्य यं मध्यमं निसर्गशिवं मार्गमुदयाय आत्थ, स एवायमभिधानरूक्षाशयाद् दुरतिष्ठितो मधौ दुर्गृहीतोद्धतो महोरग इव दशति" इत्यन्वय । 'दुरतिष्ठितो' इत्यस्य स्थाने 'दुरनुष्ठित ' इति पाठो युक्त प्रतिभाति, हे भगवन्! नियतव्यथौ नियता-अवश्यम्भाविनी व्यथा नरकादिपीडा ययोस्तौ नियतव्यथौ, स्थितिविनाश-मिथ्यापथौ स्थितिश्च सर्वेषां पदार्थानामेकान्तिकी स्थितिरेव, विनाशश्चैकान्तेन

विनाश इवेति स्थितिविनाशौ, तयोरभ्युपगमात्मकौ मिथ्यापथौ-मिथ्यामार्गौ स्थितिविनाशपथौ, तौ अतीत्य अतिक्रम्य एकान्तस्थितिवादैकान्तविनाशवादौ सांख्य-बौद्धसम्भवावपाकृत्येति यावत्, य अयम् सर्वं वस्तु प्रतिक्षणमुत्पाद व्यय ध्रौव्यात्मक, सर्वेषां पदार्थानां पूर्वपर्यायात्मना विनाश उत्तरपर्यायात्म नोत्पाद पूर्वापरपर्यायानुगामिद्रव्यात्मना ध्रौव्यमित्येवंस्वरूपम् निसर्गशिव निसर्गेण स्वभावेन, शिव-कल्याणात्मक, मार्गो मोक्षसुखप्राप्तिपथम्, एतस्य प्राधिगतये-उदयाय आत्मस्वरूपाविर्भावनाय, आत्थ कथितवानसि, स एवायम् अनन्तरोपवर्णितमवदुपदिष्ट एव मार्ग, अभिधानरूक्षाशयात् तुष्यतु दुर्जन इत्यपशब्दाकलिताभिप्रायात्, दुरनुष्ठित किं करोमि ममैका न्ताभ्युपगमोऽनेनानेकान्तवादनिपुणेन सवयाऽपाकृत इति दुःखेनात्मगतेनानु ष्ठितो-लोकयात्रानिर्वाहायासेवितो न तुदयायेति मधौ वसन्तसमये, दुर्गृही-तोद्धत दुःखेन-अतिपरिश्रमेण, गृहीतश्चासावुद्धतश्च-आविर्भावितफणाडम्बरश्च दुर्गृहीतोद्धत, महोरग महान् सर्प, इव दशति स यथा दुर्गृहीतार दशति तद्दष्टश्च पुरुषो म्रियते तथा दुरभिधानाभिप्रायेणानुष्ठितो जिनोपदिष्टमयम मार्गोऽपि दशतात दुरभिमानाभिप्रायेण तदनुष्ठानादनुष्ठाताऽकल्याणभाजन भवतीत्यर्थ । 'दुर्गृहीतो यत' इति पाठे तु यत यस्मात् कारणात्, दुर्गृहीत मन्त्रसदशनादिविधिमन्तरेण यथाकथञ्चिद् गृहीत, शेष पूर्ववत् ॥ ५ ॥

अनेकविधवाह्यवञ्चनप्रकारकुशलेभ्य परेभ्यो जिनस्य वैशिष्ट्यमुपदर्शयति—

जगद्धितमनोरथा स्वयमनावृतप्रीतय
कृतार्थनिवृत्तादराश्च विवृतोग्रदुःखे जने ।
गुणज्ञ ! परिमृग्यमाणलघव स्वनीते परे
त्वमेव तु यथार्थवादशुचिरर्थविद्भिर्वृत ॥ ६ ॥

जगद्धितमनोरथा इति । "जगद्धितमनोरथा स्वयमनावृतप्रीतय विवृते ग्रदुःखे जने कृतार्थनिवृत्तादराश्च स्वनीते परिमृग्यमाणलघव परे, हे गुणज्ञ ! त्वमेव तु यथार्थवादशुचि अर्थविद्भिर्वृत" इत्यन्वय । जगद्धितमनोरथा जगत -जन्तुमात्रस्य हित-कल्याण-जगद्धितं, जगद्धितस्य मनोरथ -कामना येषां ते जगद्धितमनोरथा जन्तुमात्रस्य कल्याण भवत्वेव कामयमाना इत्यर्थ, स्वयमनावृतप्रीतय स्वय-स्वात्मनि, अनावृता-आवरणरहिता प्रीति -

स्त्रीपुत्रघनादिविषयकः स्नेहो येषां ते स्वयमनादृतप्रीतयः, स्वात्मनि निराकृतस्त्री-पुत्रधनादिविषयकप्रीतिमन्तः, अथवा मयि सर्वेऽपि स्त्री पुत्र भ्रातृ-मातुलादयः प्रकटितप्रीतिभाजः इति निराकृतस्त्रीपुत्रभ्रात्रादिगतप्रीतिविषयाः इत्यर्थः, विवृतो मृदु रवे स्वयं विवृतं-उपदर्शितमात्मगतम्, उग्रदुःखं-दुस्सहदुःखं येन स विवृतो मृदुःख, तस्मिन्-विवृतोग्रदुःखे, जने लोके, कृतार्थनिवृत्तादराश्च कृतस्य-कर्मणः योऽर्थः-सुखं दुःखं वा स कृतार्थः, तत्र निवृत्तः-नितरां वृतः-स्वीकृतः, आदरः-बहुमानो यैस्ते कृतार्थनिवृत्तादराः । "अवश्यंभाविभावानां प्रतीकारो भवेद् यदि । तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः ॥" "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्" इत्यादिवचनोपबृंहितमेव कृतकर्मक्षयो भविष्यति तवाऽऽत्मसुखतयैव कृतार्थनिवृत्तादराश्च स्वनीते स्वानुकूलनीतिवचनतः, परिमृग्यमाणलघवः परितो मृग्यमाणः-अन्विष्यमाणः, लघुः-तुच्छप्रकृतिर्यैस्ते परिमृग्यमाणलघवः, स्वयं तुच्छप्रकृतिकत्वात् तथाविधमेव सततं गवेषयन्तः, परे अन्यवादिनः, तथा चोक्तविशेषणैः परेषां मायाविम्भः प्रकटितं भवति, हे गुणज्ञ ! सर्वविदो भगवतो गुणज्ञत्वमिव दोषज्ञत्वमप्यस्त्येव, तथापि परोपद-र्शितपदार्थवादे पराचरणे च दोषं जानन्नपि जिनो न दोषं वक्ति किन्तु सर्वेषामेव मुक्त्यभिलाषुकाणां यथार्थतत्त्वज्ञानाय तत्साधनमार्गमेव प्रमाणवरेण्यमुपदि-शति, आगमस्य प्रामाण्यं च गुणवद्वक्तृकत्वत एव, वक्तरि आगमप्रामाण्योप-योगि गुणज्ञानमावश्यकमिति गुणज्ञेति संबोधनम्, त्वमेव जिनेन्द्र एव तुर्वि-शिनष्टि-यथार्थवादशुचि यथार्थस्य-अनेकान्ततत्त्वस्य, वादः-वचनं-यथार्थ वादः, तेन शुचि-पवित्रं-यथार्थवादशुचि, अर्थविद्भिः अर्थं पदार्थतत्त्वं, विदन्ति-जानन्तीति अर्थविदस्तैः, अथवा अर्थं-परमपुरुषार्थं मोक्षं विदन्तीति अर्थविदस्तैः, वृतं अर्थतत्त्वोपदर्शकत्वेनाश्रितं इत्यर्थः ॥ ६ ॥

परेभ्यः स्वपरपरायणेभ्यः स्वयं सर्वतो निवृत्तो निजाश्रितानन्यानपि प्रवृत्ति-विरहितान् कुर्वन् जिनो विशिष्टत्वादाश्रयणीय इत्युपदर्शयति—

प्रवृत्त्यपनयक्षतं जगदशान्तजन्मव्यथं
विरामलघुलक्षणस्त्वमकरोस्तदन्तःक्षणम् ।
जनानुसुरचाटवस्तरणसत्कृतप्रातिभाः
प्रवृत्तिपरमार्थमेव परमार्थमाहुः परे ॥ ७ ॥

प्रवृत्त्यपनयक्षतमिति। 'प्रवृत्त्यपनयक्षतमशान्तजन्मार्यं जगद् विराम लघुलक्षणस्त्व तद् अन्तःक्षणमकरो, जनानुमुखचाटवस्तरुणसत्कृतप्रातिभा परे प्रवृत्तिपरमार्थमेव परमार्थमाहुः' इत्यन्वयः। प्रवृत्त्यपनयक्षतं प्रवृत्त्या- सांसारिकविविधविषयोपभोगानुगुणप्रवृत्त्या, अपनयः-कुमार्गगमनादिलक्षणः-प्रवृत्त्यपनयः, तेन क्षतम् अत एव अशान्तजन्मव्यथं न शान्ता-न निवृत्ता-अशान्ता, जन्मव्यथा-भूयोजन्मग्रहणपीडा यस्य तदृशान्तजन्मव्यथं, जगत् जन्तुजातं अस्तीति शेषः, हे वीर! विरामलघुलक्षण विरामः-सर्वकर्मतो विरमणमेव, लघु-विशेषणान्तररहितं यल्लघुभूतं लक्षणम्-अन्यतो व्यावर्तकं चिह्नं यस्य स विरामलघुलक्षणः त्वं जिन तत् निरुक्तस्वरूपमपि जगत्, अन्तःक्षणम् अन्तः-मध्ये, निवृत्तिप्रधानधर्मशासनप्रवर्तनकाले इत्यर्थः, क्षणः-परमानन्दपदप्राप्तिलक्षण उत्सवो यत्र तादृशम् अकरोः कृतवान्, जनानु-मुखचाटवः जनानां-लोकानाम् अनुमुखं-सम्मुखं-जनानुमुखं, जनानुमुखं चाटु-मनोहरवचनं येषां ते जनानुमुखचाटवः, स्वसमीपवर्तिजनहृदयङ्गमवचनव-क्तारः, तरुणसत्कृतप्रातिभाः तरुणैः-युवजनैः सत्कृता-बहुमानपुरस्कृता-तरुणसत्कृता, प्रातिभा-नवनवोन्मेषशालिनी बुद्धिः प्रतिभा, तयोल्लसिताः पदार्थाः प्रातिभाः, तरुणसत्कृताः प्रातिभा येषां ते तरुणसत्कृतप्रातिभाः, युव-जनानुमोदितमतिमाशालिनः, एतादृशाः सन्तः परे जिनव्यतिरिक्ता-एकान्तवादिनः, प्रवृत्तिपरमार्थं प्रवृत्तिरेव परमः-उत्कृष्टः, अर्थः-प्रयोजनं यत्र स प्रवृत्ति-परमार्थस्तं परमार्थं तात्त्विकार्थम्, आहुः कथयन्ति ते च प्रवृत्तिप्रधाना-न्यानपि कर्माणि प्रवर्तयन्त्येव, येन तदुपदेशस्थितानां जनानां चिरकालं भवभ्रमणमेव भवति, दूरे तेषां निर्वाणमित्याशयः ॥ ७ ॥

नियतिस्वभावकालपौरुषकर्मणां पञ्चानां कार्यमात्रे कारणानां परस्परसह-कारिणामपि सतां क्वचित् कार्यं कस्यचित् प्राधान्यमाश्रित्य कारणत्वविवक्षया सकलनयमयै जिनसमये नियतिवादादयः पञ्च वादास्तुल्यकक्षा विराजन्ते, एवमपि तथाविधसमयप्रणेतुर्भगवतो जिनस्य प्रतिपक्षवादोपदर्शितेन स्वान्यवाद-गतदोषेण न मालिन्यमित्याशयमस्याकमित्युपदर्शयति--

> क्वचिन्नियतिपक्षपातगुरु गम्यते ते वचः
> स्वभावनियताः प्रजाः समयतन्त्रवृत्ताः क्वचित्।

स्वयकृतभुज क्वचित् परकृतोपभोगा पुन-
र्न वा विशदवाद! दोषमलिनोऽस्यहो विस्मय ॥ ८ ॥

क्वचिदिति । "विशदवाद! ते वच क्वचिद् नियतिपक्षपातगुरु गम्यते' क्वचित् स्वभावनियता प्रजा, क्वचित् समयतन्त्रवृत्ता, क्वचित् स्वयंकृतभुज, क्वचित् पुन परकृतोपभोगा, अहो विस्मय, न वा दोषमलिनोऽसि" इत्यन्वय । **विशदवाद!** विशद -एकान्तवादापतद्दोषमालिन्यरहितत्वेन निर्मल, वाद -स्याद्वादसिद्धान्तो यस्य तत्सम्बोधने तथा, एवविध हे जिन! ते तव, वच वचन, समयमहोदधि क्वचित् स्वस्यैव प्रदेशे विषये वा, एवमग्रेऽपि, **नियति पक्षपातगुरु** नियतौ-नियतिबलादेव प्रतिनियतसमय प्रतिनियतदेश प्रतिनियत-स्वभावाद्याकलित वस्तूत्पद्यत इत्येव कार्यमात्र नियतिरेव कारणमित्यस्मिन्, य पक्षपात -आग्रह, तेन गुरु गौरवशालि-नियतिपक्षपातगुरु **गम्यते** ज्ञायत, **स्वभावनियता प्रजा** क्वचिदित्यस्यात्रापि सम्बन्ध, ते वचो गम्यत इत्यस्यापि सम्बन्ध एवमग्रेऽपि, क्वचित् स्वभावनियता स्वभावेन नियता -स्वभावनैव सर्वे पदार्था भवन्तीति प्रकर्षेण जायन्त इति **प्रजा** कार्यमात्रम्, इति ते वचो गम्यत इत्यर्थ, क्वचिदित्यस्य पूर्ववद् व्याख्यानम् **समयतन्त्रवृत्ता** समयस्य-कालस्य तन्त्रेण-अधीनत्वेन, वृत्ता -सम्पन्ना प्रजा इति सम्बन्ध, सर्वे पदार्था कालादेव जायन्ते इत्यर्थ, क्वचित् **स्वयंकृतभुज** स्वयंकृतेन-स्वक्रियया स्वप्रयत्नेन स्वपुरुषकारेणैवेति यावत्, भुञ्जते-ये फलमनुभवन्तीति स्वयंकृतभुज, पुरुषकारेणैव सर्वे कार्यजातमुद्भवतीति ते वचो गम्यत इत्यर्थ क्वचित् पुनः **परकृतोपभोगा** परस्मिन् जन्मनि कृत कर्म-परकृतं, तस्योपभोग -तज्जन्यसुखदुःखानुभवो येषां ते परकृतोपभोगा, न नियत्या न स्वभावेन न कालेन न वा पुरुषकारेण फलनिष्पत्ति किन्तु पूर्वजन्मकृतशुभाशुभकर्मलक्षणादृष्टादेव सर्वं भवतीति ते वचो गम्यत इत्यर्थ एव परस्परविभिन्ननयाश्रित पञ्चवादप्रभानेऽपि **न वा** नैव, **दोषमलिनोऽसि** दोष -अन्योन्य वादेनोद्भावितो यो दोष तेन मलिन -जिनप्ररूपितेषु नियत्यादिवादेषु परस्परोद्भाविता इमे दोषा इत्येवमेकान्तवाद्याम्रेडितापवादजनितमालिन्यवान् नैव भवसि, विभिन्ननयाकलितापेक्षाभेदेन पञ्चानामपि वादाना निर्दुष्टत्वात्, इति अहो **विस्मय** आश्चर्यमस्माक मन्दमतीनामित्यर्थ । नियत्यादिवादाश्च शास्त्रवार्तासमुच्चये सम्यक् प्ररूपिता विशेषजिज्ञासुभिस्तत एवावधार्या ॥ ८ ॥

निमीलितविलोचनस्य जगत उन्मीलितलोचनत्वं त्वयैव सम्पादितमित्याह—

परस्परविलक्षणाश्च न च नामरूपादय
क्रियापि च न तानतीत्य न च ते क्रियैकान्तत ।
निरोधगतयस्त एव न च निष्क्रिया निश्चया
निमीलितविलोचनं जगदिदं त्वयोन्मीलितम् ॥ ९ ॥

परस्परविलक्षणाश्चेति । 'नामरूपादय परस्परविलक्षणाश्च न, तानतीत्य क्रियापि न च, ते क्रियैकान्ततो न च, त एव न च निरोधगतय निष्क्रिया निश्चया न च निरोधगतय, निमीलितविलोचनमिदं जगत् त्वयोन्मीलितम्" इत्यन्वय । नामरूपादयः नामाऽऽकृति द्रव्य भावा, परस्परविलक्षणा अन्योन्य सर्वथा वैलक्षण्यभाज, न च नैव, नाम्नोऽपि घटात्मस्वरूपस्य घकाराकाराटकारोत्तराऽस्वरूपानुपूर्वीलक्षणाकृतिमत्वात्, उत्तरघकाराद्यपरपर्यायापेक्षया द्रव्यरूपत्वात्, वर्तमानघटस्वरूपभावरूपत्वात्; कम्बुग्रीवादिमत्स्थानलक्षणाकृतरपीयमाकृतिरिति नामकरणेन नामत्वात् उत्तरपर्यायकारणत्वेन द्रव्यरूपत्वात् वर्तमानाकृतिस्वरूपत्वेन भावत्वात् घटादिकारणमृद्द्रव्यस्यापि मृदिति नामकरणेन नामत्वात् पिण्डरूपेण मृदो-वस्थानलक्षणाकृतिमत्वात्, वर्तमानमृत्स्वरूपतया भावत्वात् घटात्मलक्षणभावस्यैव घटोऽयमिति नाम क्रियत इति नामत्वात् पृथुबुध्नोदराकृतिमत्वात्, उत्तरपर्यायकारणत्वेन द्रव्यत्वात् कथञ्चिदविष्वग्भावलक्षणसम्बन्धस्य सम्बन्धमात्रव्यापकत्वेन नामाकृत्यादीनां यत्किञ्चित्सम्बन्धसद्भावे तादात्म्यस्यावश्यम्भावादिति नामरूपादीनां सर्वथा वैलक्षण्यं नास्तीत्यर्थ । तान् नामरूपादीन्, अतीत्य अतिक्रम्य, नामरूपादिकं विहायेत्यर्थ, क्रियापि आगमविहितानुष्ठानादिकमपि न च नैव भगवन्नामरूपादिकं परित्यज्य तदर्थेन स्तुति वन्दनादिक्रियाऽपि नोपपद्यत इत्यर्थ । ते सक्रिया नामरूपादय, क्रियैकान्तत क्रियामात्रत न च नैव, ये कश्चिन्नामरूपक्रियादयस्ते क्रियामात्रतो नैव, किन्तु ज्ञानादिसहकृतक्रियात एव, उपादानप्रत्यक्षेष्टसाधनताज्ञानकृतिसाध्यताज्ञानजन्यचिकीर्षाजन्यप्रवृत्तित एव घटाद्युत्पत्ते परेणाभ्युपगमात्, सम्यग्ज्ञानदर्शनसहकृतचारित्रादेव मोक्षोद्भवस्य सिद्धान्तसिद्धत्वात्, सम्यग्ज्ञानादरपि कारणान्तरसव्यपेक्षतप स्वाध्यायादेरेवोत्पत्ते, न तु क्रियामात्रत इत्यर्थ । त एव केवलनामरूपादय क्रिया चैव, न च नैव, निरोधगतय

कर्मपुद्गलादाननिरोधस्य नतय –साधनानि, किन्तु ज्ञानसहकृता एव, निश्चया निश्चयात्मकज्ञानान्यपि, विक्रिया क्रियाविकला, निरोधगतय, न च नैव।

"न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते। न च संन्यसनादेव सिद्धिं समधिगच्छति ॥" इति गीतावचनं चात्र संवादकम्। इत्थमुपदर्शनेन निर्मीलित विलोचन निमीलित-पक्ष्मपुटकाच्छादित, विलोचनं-नेत्रं यस्य तन्निमीलित विलोचनम्, अज्ञानात्मकपक्ष्मपुटकाच्छादितज्ञानात्मकलोचनकमिति यावत्, इदं परिदृश्यमानं जगत् माणिक्यदर्पण हे भगवन्! त्वया, उन्मीलित उद्घाटितपक्ष्मपुटकनेत्रं कृतमित्यर्थ ॥ ९ ॥

अपरमप्युपदर्शनान्तरं भगवता वचनमात्रेणापराजितैर्निर्निमेषमतिर सुष्ठुवस्था पितमित्याह—

न कश्चिदपि जायते न च परत्वमापद्यते
प्रतिक्षणनिरोधजन्मनियताश्च सर्वाः प्रजाः।
य एव च समुद्भव स विलय प्रतिस्व च तौ
तवापरमिदं मन स्वनलसैर्निरातं वचः ॥ १० ॥

न कश्चिदपि जायत इति। "कश्चिदपि न जायते, परत्वमापद्यत न च, सर्वा प्रजा प्रतिक्षणनिरोधजन्मनियताश्च, य एव च समुद्भव स विलयः तौ च प्रतिस्वं, तव इदमपरं वच अनलसैर्मनस्सु निखातम्' इत्यन्वयः। कश्चिदपि कोऽपि पदार्थ, न जायते सर्वथा स्वाधिकरणक्षणध्वंसानधिकरणक्षणसम्बन्धात्मकोत्पादवान्न भवति, पूर्वं सर्वथाऽसत उत्पादोपगमे शशशृङ्गादेरप्युत्पादः प्रसज्येतेत्यत पूर्वं कथञ्चित् सत एवोत्पादोऽभ्युपेयः, एवञ्च तस्य सर्वेऽपि क्षणा स्वाधिकरणक्षणपूर्ववर्तिक्षणध्वंसाधिकरणा भवन्ति स्वाधिकरणक्षणध्वंसानधिकरण क्षणाप्रसिद्ध्या तत्सम्बन्धरूपोत्पादस्याप्यप्रसिद्धेः, एतेनासत्कार्यवाद प्रतिक्षिप्तः। सर्वथापरिणामवादं पूर्वस्वभावं सर्वथा परित्यज्योत्तरस्वभावरूपेण परिणमत इत्येवंस्वरूप प्रतिक्षिपति-परत्वं पूर्वस्वभावात्यन्तभिन्नस्वभावत्वम्, आपद्यते प्राप्नोति, न च नैव, पूर्वस्वभावविनाशे स्वभावस्वभाववतोरभेदात् स्वभाववतोऽपि विनाशेनासत्त्वस्य परस्वभावाश्रयत्वासम्भवात्; तर्हि पदार्थाः कीदृशा? सर्वा प्रजाः सर्वाणि वस्तूनि, ... निरे...

निरोध -विनाश, जन्म-उत्पादश्चेति-प्रतिक्षणनिरोधजन्मनी, प्रतिक्षणनिरोध जन्मान्यो नियता -व्याप्ता -प्रतिक्षणनिरोधजन्मनियता, प्रतिक्षणं केनचिद्रूपेण नश्यन्ति केनचिद्रूपेणोत्पद्यन्ते, निरन्वयोत्पादविनाशयोरसम्भवात् केनचिद्रूपेण तिष्ठन्ति चेत्यर्थ ; एतेन सदसत्कार्यवाद कथञ्चिद्रूपेणावस्थित एव पूर्वरूपं परित्यज्य रूपान्तरेण परिणमत इत्येव कथञ्चित्परिणामवादश्च नैयायिकाभ्युपगमपथ नीत इति। उत्पत्तिविनाशयो कथञ्चिद्भेदोऽपीत्याह-य एव च य एव पुन, समुद्भव उत्पाद स उत्पाद, विलय विनाश, तौ च उत्पाद-विनाशौ च, प्रतिसख्यानि प्रतिव्यक्ति, हे जिन!, तव इद भवन्तरोपदर्शितम्, अपर पूर्वोक्तवचनभिन्न, वच: वचनम्, अनलसै आलस्यरहितै यथासमर्थ स्वाध्यायव्यसनपरायणै, मनस्सु अन्त करणेषु, निखात तथाऽवस्थापितं यथा बहिर्न गच्छति, भूमौ निखात रत्नादिकं यथा तत्रैवावतिष्ठते, कायकार्य चाप्यते तथेदमपीत्यर्थ ॥ १० ॥

कार्यकारणभावेन भवहेतु भोक्त्रादीनां भिन्नतया सरलमनसादयतो गुम्फन मयाकृतं जिनेनैव कृतम्, अन्योपदिष्टभवहेत्वादिस्वरूपव्याख्यव्यवस्थितत्वाज्जिनो पदिष्टभवहेत्वादिस्वरूपस्यैव स्याद्वादमर्यादया व्यवस्थितत्वादित्याह—

> पृथग् भवहेतुरस्ति न च भोक्तुरन्यो भवो
> प्रसूतिरपि जायमानमतितोऽस्ति नान्या न च।
> स्थितिर्गमनमुन्नतिर्व्ययमनमिष्टयो वुद्धय-
> स्तथत्वनवबद्धपूर्वमपरं प्रबद्ध त्वया ॥ ११ ॥

पृथग् भवहेतुरस्तीति। "भवहेतु पृथङ् नास्ति, भोक्तुरन्यो भवो न च, प्रसूतिरपि जायमानमतितोऽन्या नास्ति ['जायमानमतिना' इत्यस्य स्थाने जायमानमतितो' इति पाठो युक्त] स्थितिगमनमुन्नतिर्व्ययमनमिष्टयो वुद्धयस्तथा, न च, अपरैरित्यनवबद्धपूर प्रबद्ध त्वया प्रबद्धम्' इत्यन्वय। भवहेतु भवस्य-संसारस्य, हेतु पृथग् एकान्तेन भवाद् भिन्नो, नास्ति न विद्यते, प्रवाहतो भवस्यानादित्वेन तदन्य पातितो भवस्य कारणतया यद्यभिमत तस्यापि भवान्तर भवाभिन्नतयाऽस्तित्वाभावात्, पदार्थसमूहात्मकस्य भवस्य समूहसन्निविष्टैकैकस्य समूहिनो भवत्वाभावे तत्समूहस्यापि भवत्वासम्भवात्, प्रत्येकावृत्तिधर्मस्य

समुदायाकृतित्वात्; भोक्तु सुखदु खाद्युपभोगकर्तुरात्मन, अन्यो भिन्न, भव ससार, न च न विद्यते भोक्तृ-भोग्य-तदुपादानादिसमष्टिरेव ससार समुदायस्य च समुदायात्मन एव भावो न तु तद्भिन्नस्येति; भवति-उत्पद्यत इति व्युत्पत्त्या भवस्योत्पत्तिरूपत्वेऽपि तद्बुद्धिरेव तस्सेति ततो व्यतिरिक्तस्य तस्य नास्तीत्याह—प्रसृतिरपि उत्पत्तिरपि, जायमानमतित जायमानस्य-उत्पद्यमानस्य, मतित -ज्ञानात्, अन्या भिन्ना, नास्ति न विद्यते स्थिति अवस्थानम् गमन उत्तरदेशसंयोगानुकूला क्रिया, उन्नति उत्कर्ष, व्यसन द्यूताद्यासेवनं सकष्टं वा, इत्यय यागादय, युद्धय प्रत्यक्षादिज्ञानानि, तथा न च तद्भिन्नो भिन्ना नैव, अपरै अन्यवादिभि, इति एवं प्रकारेण, अनवयद्धपूर्व पूर्व-पूर्वकाले, अनवबद्ध-न भवबद्ध-भवहेतुमोक्षादिरूपेण न सघटितम्, अनवबुद्धमिति पाठे तु पूर्वमज्ञातमित्यर्थ, हे जिन! त्वया प्रबद्ध प्रकर्षेण सङ्कलितम्, स्याद्वादावलम्बनेन कथञ्चिद् भवाद् भवहेतु पृथग्, भवोऽपि भोक्तु कथञ्चिद्न्य इत्येवं दिशा सङ्घटितमिति यावदित्यर्थ प्रबुद्धमिति पाठे तु प्रकर्षेण ज्ञातमित्यर्थ ॥ ११ ॥

त्वं परमार्थतत्त्वग्रहयालुर्ना परम सुन्दर, त्वदुपदिष्टप्रकारेणैवात्मन परमात्मतेत्याह—

स्वभावनियतस्त्वया जिन! न कश्चिदात्मोदित-
स्त्वमेव च पर ललाम परमार्थतत्त्वार्थिनाम्।
असम्भ्रमनाशमेकममितक्षयस्थानिन
यथैनमवदस्तथैव परमात्मताऽस्यात्मन ॥ १२ ॥

स्वभावनियत इति। "हे जिन! कश्चिदात्मा स्वभावनियतस्त्वया नोदित, च-पुन परमार्थतत्त्वार्थिनां त्वमेव परं ललाम, असम्भ्रमम् अनाशम् एकम् अमितक्षयस्थानिनम् एनं यथाऽवद तथैवाऽस्याऽऽत्मन परमात्मता" इत्यन्वय। कश्चिदात्मा कोऽप्यात्मा, स्वभावनियत अयमात्मा किञ्चिज्ज्ञस्वभाव, अयमात्मा सर्वज्ञस्वभाव, अयमात्मा परमात्मस्वभाव इत्येव विभिन्नस्वभावे नियत-अवस्थित त्वया जिनेन, न नैव, उदित कथित, च पुन, परमार्थतत्त्वार्थिनां परमश्चासावर्थश्च परमार्थ परमार्थ एव तत्त्व-परमार्थतत्त्वं, परमार्थतत्त्वमर्थयन्त इति परमार्थतत्त्वार्थिनस्तेषां परमार्थतत्त्वार्थिनां,

भवान् कथयतीति फलितार्थ, क्षमाशब्दश्चाव्ययेऽपि पठितोऽस्ति, तस्येह ग्रहणे द्वितीयायामपि 'क्षमा' इति स्वरूपाच्च इतिशब्दाध्याहारापेक्षा, क्षमामवाप्य इति तदर्थ, अस्मिन् पक्षे न पर्यायनयप्राधान्याश्रयणापेक्षा, न वा शतृप्रत्ययोत्पाद नविडम्बना, तथाहि-"रुष हिंसायाम्" "रुष रोषे" "रुषण् रोषे" इति त्रयाणामपि धातूनां शतृप्रत्यये क्रमशो 'रोषन् रुष्यन् रोषयन्' इति रूपाणि भवन्ति, 'रुषन्' इति न कस्यापि एतदर्थं तुदादिगणकल्पना कल्पया भवति, सा-पि नेदानीं कर्तव्येत्यर्थ। अभ्युदयति अभितः उत्कर्षे, विकृति विकृति, न नैव, इति स्वमात्थ, अयं भाव -अभ्युदयति किञ्चिदमन् कैवल्यत्वमप्यवाप्य, सा सदैव पयत्नमावरणापगमाद्याविर्भूतति न विकृतिरिति। अतिमार्दव अतिरेकशालिनी मृदुता-नम्रता मानम् अभिमान न अर्थात् मानमेव, इति स्वमात्थ, 'सर्वतो नम्रीभूय मया ईदृक् कार्य साध्यत' इत्याद्याशयादिना यत्र तत्र क्रियमाणा मृदुता स्वाभिमानमेवेति भाव, यद्वा अनुप्रासानुरोधेन "न मानमतिमार्दवम्" इति स्थाने "न नाममतिमार्दवम्" इति पाठान्तरे तु-अतिमार्दवम्, नाम नमनं नम्रीभावं मानामात्रमिति यावत्, न न स्वमात्थ इति व्याख्येयम्। एवम्-आर्जव ऋजुता सरलता, निकृति दम्भ, न न नाम अर्थात् दम्भ एव इति स्वमात्थ, स्वकार्यसाधनाय केवल बहिर्वृत्त्या दर्श्यमाना ऋजुता दम्भ एवेत्यर्थ। ऋत सत्यम्, वितथमेव असत्यमेव, इति स्वमात्थ, सद्भ्यो हित सत्यमिति व्युत्पत्त्या यथार्थमपि वचनं यदि परपीडाकरं भवेत् तदा तद् असत्यमेवेत्यर्थ, गुप्ति कायादिचेष्टापरिहार, अथवा तप आहारत्याग, किल्बिष पापमेव, इति स्वमात्थ, बकस्य मत्स्य-ग्रहणार्थं कायगुप्ति पापमेव, एव शत्रुमारणादिशक्तिसम्पादनकृते क्रियमाण तप पापमेवेत्यर्थ, क्वचित् "गुप्तिरयतिस्तप" इति पाठ, तत्र अयति यमा भाव, गुप्तिर्यमाभाव एव इति स्वमात्थेत्यर्थ, विमुक्तिमपि विशिष्टत्यागमपि बन्ध बन्धनमेव, त्वमात्थ, अङ्गारमर्दक-विनयरत्नादीनां विशिष्टत्यागमयी प्रव्रज्यापि दुष्टाशयाद् कर्मबन्धनफलैव नान्यथा, नान्यथा यद् वस्तु साधारण-जनेन प्रतीयमानस्वरूपतो विवक्षाभेदेनान्यथा-विपरीत न भवति तद् तद् वस्तु न तथा प्रतीयमानस्वरूपमपि न भवितुमर्हति, स्वद्रव्यादित सत्त्वेन परद्रव्यादितोऽसत्त्वनाकलितस्यैव वस्तुत्वादिति, भगवन् भवदभिहितं चारुतर मेवेति भाव ॥ १४ ॥

एकान्तेन कर्तृ भोग्यादेरभावप्रतिपादने भवतो निश्चयापेक्षं [illegible]

न कश्चन करोति नापि परिभुज्यते केनचि-
न्न वेद्यमपि किञ्चिदस्ति न च न क्रियाभूतय'।
भवन्न च भवान्तरं व्रजति कश्चिदभ्येति वा
गतिं न च विना भवोऽस्त्यभव! निश्चितं ते [illegible]

न कश्चनेति। 'कश्चन न करोति नापि केनचित् [illegible] न च किञ्चिदस्ति, क्रियाभूतयो न, भवन् भवान्तरं न [illegible] न च गतिं विना भवोऽस्ति, हे अभव! ते वचो निश्चितम्' [illegible] कोऽपि पुरुष, न नैव करोति किञ्चिदपि कार्य [illegible] नापि नैव, केनचित् कनापि पुरुषेण, परिभुज्यते [illegible] भवति तस्मान्नास्ति भोक्ता भोग्याभावाद् भोक्तुरभावः, [illegible] नास्ति, वेद्याभावाद् वेदकस्याप्यभाव इति नास्ति [illegible] किमपि वस्तु अस्ति-सत्ताश्रय, तथा चाश्रयाभावा[illegible] भूतय पचन-पठनादिलक्षणक्रियोत्पत्त्यादय, न [illegible] व्यापकादीनामप्यभाव भवन् पूर्वकृतकर्म[illegible] परभव, न व्रजति न गच्छति, भवस्थितस्य [illegible] भावो नास्तीत्यर्थ वा अथवा, कश्चित् कोऽपि [illegible] भवान्तरं नागच्छति, मरणानन्तरं जन्म [illegible] गमनस्वरूपं संसरणं संसारो नास्तीत्यर्थ गतिं [illegible] गतिं विना भव संसारो न च नैव अस्ति [illegible] सोऽभवस्तस्य संबोधने-हे अभव! ते तव, [illegible] समुच्चयम्, कर्तृ भोक्त्रादेर्व्यावहारिकत्वात्, [illegible] त्वात्तान्यत्वान्येन सम्बन्ध, कर्तृत्वभोक्तृ[illegible] सम्भवन्तीत्याशय ॥ १५ ॥

यदा परवादिनो निश्चयनय परपी[illegible] भवता प्रशमहेतुतया स योजित इत्युच्यते—

वियोजयति चासुभिर्न च [illegible],
शिवं च न परोपम[illegible]।

नधाय नयमभ्युपैति च परान्न निघ्नन्नपि
त्वयाऽयमतिदुर्गमः प्रशमहेतुरुद्योतितः ॥ १६ ॥

वियोजयतीति । "असुभिर्वियोजयति च, वधेन नयुज्यते न च, परोपमर्द-पुरुषस्मृत शिव न च विद्यते परान् निघ्नपि च वधाय नय नाभ्युपैति, हे भगवन्! अतिदुर्गमोऽय प्रशमहेतु त्वयोद्योतित" इत्यन्वय । असुभि प्राणै, वियोजयति च प्राणिनं विघटयति च, न च वधेन हिंसया सयुज्यते सयुक्तो भवति, यागादौ छागादिक प्राणिन यज्ञकर्ता पुरुष खड्गप्रहारेण घातयति ।

"यज्ञार्थं पशव सृष्टा यज्ञार्थं पशुघातनम् ।
अतस्त्वा घातयिष्यामि यस्माद् यज्ञे वधोऽवध ॥

इत्यादि वचनं प्रमाणीकुर्वन् वधेन-हिंसादोषेण सयुक्तो न भवति "मा हिंस्यात् सर्वा भूतानि" इति श्रुतिवचनेन यज्ञाङ्गहिंसातिरिक्तहिंसाया एव प्रतिषेध इति दुर्दुरमीमांसकमते चेदम् परोपमर्दपुरुषस्मृते परस्य-द्वितीयस्य, उपमर्देन-निषेधेन, या पुरुषस्मृति-अद्वितीयब्रह्मज्ञान तस्मात् स्मरणस्यात्र विशिष्टज्ञानरूपत्वात्, शिव कल्याणं मोक्षसुख वा, न विद्यते अद्वितीयब्रह्मण एव पारमार्थिकत्वात्, बन्धमोक्षादिक किमपि नास्तीति वेदान्तिन सद्भिरुक्ते, परान् परप्राणिन निघ्नन्नपि मारयन्नपि, वधाय वधार्थं नय नीतिवचन न नव, अभ्युपैति स्वीकरोति काशीमरणान्मुक्तिरित्यादिवचन प्रमाणीकुर्वन् कादया यत्रविधानेन प्राणिन निघ्नन् अनेनायमसृत एवत्यध्यवस्यन् न घातको भवतानि हे भगवन्! अतिदुर्गम अतिशयेन दु खेनावबोद्धु शक्य, अति गम्भीर इत्यथ अयम्, अनन्तरोपवर्णितो निश्चयनयवाद, । प्रशमहेतु प्रशमकारण, त्वया सप्तनयमयप्रमाणसूद्घाभिविक्तकेवलज्ञानवता भवता, उद्योतित उद्द्योतित ।, अय भाव -प्रणयिजनमरणादिजनितशोकादिसकुलान् लोकान् निजनिधनभयभीतान् वा जनान् 'अयमात्माऽविनाशी न कदाचन म्रियते, कवचं देहपरावर्तनादिक भवतात्यत शोकादिना' इत्यादिनिश्चयनयवचनेन शोकादीनपाकृत्य परमोपशमभार नयति निज इति विनेन निश्चयनय प्रशमहेतु तया समुद्योतित ॥ १६ ॥

जिनवचनविमुखा पापभीरव आदृतसत्या परहितरुचयोऽप्यकल्याणमेवा नुभवन्ति, हे जिन ! तव वचनविरता एव कल्याणमनुभवन्तीत्याह—

अपुण्यपथभीरवो वचनसत्य ! सत्यादरा
पतन्त्यशिवमेव सत्यवचनार्थमूढा जनाः ।
परप्रियहितैषिणश्च बहुयातनापाणयः
समन्तशिवसौष्ठवं तव न ये वचः सनताः ॥ १७ ॥

अपुण्यपथभीरव इति । "हे वचनसत्य ! ये अपुण्यपथभीरवः सत्यादराः सत्यवचनार्थमूढाः परप्रियहितैषिणश्च बहुयातनापाणयो जनाः, तव समन्तशिव सौष्ठवं वचो न सनताः, अशिवमेव पतन्ति" इति सम्बन्धः । हे वचनसत्य ! वचनं सत्यं यस्य स वचनसत्यः, यद्वा वचने-प्रतिपादने, सत्यः-यथार्थः, सत्य वक्तेत्यर्थः, तत्सम्बोधने-वचनसत्य !, ये अनिर्दिष्टनामानः केऽपि, सत्यादराः सत्ये आदरः-बहुमानो येषां ते सत्यादराः; सत्यवचनार्थमूढाः सत्यवचनस्यार्थे मूढाः-ज्ञानविकलाः, अस्य सत्यवचनस्यायमर्थः सत्यं इत्यर्थनिर्णयात्मक ज्ञानरहिताः च पुनः, परप्रियहितैषिणः, परस्य यत् प्रियं-मनोनुकूलं हितम्-आयत्यामानन्ददायकं-परप्रियहितं, तदैषिणः-तदिच्छकाः, कयोपायेन परस्य प्रियं हितं स्यादित्यनवरतं तदुपायान्वेषणव्यग्राः, बहुयातनापाणयः बहवो यातनाः-परभयोत्पादकाः खड्गादयः पाणौ येषां ते बहुयातनापाणयः, एवंविधाः, जनाः लोकाः तव जिनस्य, समन्तशिवसौष्ठवं अत्यन्तकल्याणैकमनोहरं वचः वचनं, सनताः सम्यक् प्रणताः न नैव वस्तुगत्या अपुण्यपथभीरवो यदि किमिति हिंसादिप्रधानयज्ञादिक्रियामनुतिष्ठन्ति ?, यदि च सत्यादरास्तर्हि वचनसत्यस्य जिनस्य सत्ये वचस्येवादरः समुचितस्तेषां, जिनवचनातिरिक्तवचना दराश्च न वस्तुतः सत्यादराः, जिनवचनातिरिक्तवचनार्थाभिज्ञाश्च सत्यवचनार्थ मूढा एव अन्यवचनार्थस्य सत्यवचनार्थत्वाभावात्, यदि च वस्तुगत्या परप्रियहि तैषिणः किमिति परक्षोभकरं खड्गादिकं पाणौ धारयन्ति ?, खड्गादिपाणयश्च न वस्तुतः परप्रियहितैषिणः, कल्याणैकनिकेतनजिनवचनप्रणामविमुखानामकल्याणै कनिकेतननरकादिगतिनिपातो युक्त एवेत्याशयः ॥ १७ ॥

हे जिन ! मदपराहतजनैर्दुर्वारणाय भवदीयवचनामृतं पीयत इत्याह—

य एव रतिहेतवः समफलास्त एवार्थतो
न च प्रशमहेतुरेव मतिविभ्रमोत्पादकः ।

य एव च समुद्भव स विलय प्रतिक्षणं च तौ
तवामृतमिदं वचः प्रतिहतैर्गदै (दे) पीयते ॥ १८ ॥

य एवेति । 'य एव रागादिजनक एव शमजनक प्रशमहेतुरेव मतिविभ्रमोत्पादको न च, य एव समुद्भव स विलयश्च, तौ च प्रतिक्षणम्, हे वीर ! गदैः प्रतिहतैस्तवेदं वचोऽमृतं पीयते ' इत्यन्वय । य एव ये कचन कामिनी प्रमुखा पदार्थाः, रतिहेतवः रागजनकाः, त एव निष्कामिनीप्रमुखा पदार्था एव अर्थात् परम्परया, शमजनका इत्यर्थ, 'समफला' इति स्थाने 'शमफला' इति पाठ सम्यगाभाति, तथा च शमफला कामिन्यादिकं व्यक्तिविशेष वा समाश्रित्य वैराग्यादुत्पन्ना प्रशमरसजनका भवन्ति; नन्वेवं सति रागहेतूनां शमहेतूनां च साङ्कर्याद् भवदुपदर्शितः प्रशमहेतुरेव मतिभ्रमकारको भविष्यतीत्याशङ्कायामाह—न च प्रशमहेतुरित्यादि । प्रशमहेतुरेव प्रशमजनकत्वेनाभिमतो रागादिजनकपदार्थ एव मतिविभ्रमोत्पादक यदि रागहेतुरेव शमहेतुस्तदा वस्तुगत्या क शमहेतु को रागहेतुरिति नियमाभावात् मतिभ्रमजनक इति न च नैवाशङ्कनीयमित्यर्थ; कुत एतदित्याह—य एव समुद्भव य एव रागादीनामुत्पाद, स विलय विशिष्टो लयो विनाशो यस्य स तथा, उत्पत्तिमतो वश्यं विनाश इति नियमात् समुत्पन्नस्य रागस्य विनाशे सति वैराग्यात् प्रशमो भविष्यतीत्यर्थः ; ननु एतन्नियमे किं बीजमित्याह—प्रतिक्षणं प्रतिव्यक्ति, तौ उत्पादविनाशौ, भवत इति शेष, हे वीर ! तव नित्यम् इदं अनन्तरोक्तम्, वचोऽमृतं अमृतवद् रस्यमानं सद् आनन्दकन्दोल्लास कत्वाद् वचनरूपममृतम्, प्रति अर्थात् इति शेषः अवशिष्टं स्वत्कृतवचनामृतपानजनकभाग्यशून्यैः, गदं विषं पीयते, यद्वा 'गदै' इति स्थाने 'गदै' इति पाठ, गदैः गदशब्द -कृष्णानुज रोगे कथने विषे च वर्तते, आवृत्त्या च रोगमयैः विषमयैश्च, परवादिवचनैः, प्रतिहतैः सञ्जातज्ञानस्वरूपाघातैः, पीयते ज्ञानस्वरूपावाप्तिलक्षणरोगनिवर्तनेन हृदयगतं क्रियत इत्यर्थ ॥ १८ ॥

अहन्त्वममत्वाद्यभिमाने विद्यमाने सति यथास्थितस्य न प्रशान्त्युदयो न वा भेदकारणरागद्वेषनिवृत्तिरित्याह—

ममाहमिति चैष यावदभिमानदाहज्वर
कृतान्तमुखमेव तावदिति न प्रशान्त्युन्नय ।

यत्र सुखपिपासितैरयममानर्थोत्तरै
परैरपसद कुतोऽपि कथमप्यपाकृष्यते? ॥ १९ ॥

ममेति। 'ममेति अहमिति चैषोऽभिमानदाहज्वरो यावत् तावत् कृतान्तमुख मेवति प्रशान्त्युद्यमो न, यत्र सुखपिपासितैरनर्थोत्तरे परैरयमसावपसद, कुतोऽपि कथमप्यपाकृष्यते?' इत्यन्वय । ममेति-मम कलत्र मम बान्धवो मम पुत्रो मम माता मम पिता मम मातामहो मम मातुल इत्याद्याकार इत्यथ, अहमिति-अह ब्राह्मणोऽह श्रोत्रियोऽह धनिकोऽह ग्रामाधिपतिरह राजेत्याकार इत्यथ, एष प्रत्यक्षात्मक, अभिमानदाहज्वर अभिमान एव दाहज्वर - शरीरसतापकारी ज्वरोऽभिमानदाहज्वर, यावत् यावत्काल वर्तते, तावत् तावत्कालं, कृतान्तमुखमेवेति-कृता तस्य-मृत्यो, मुखमेव-मुखप्रविष्टत्वमेवेत्येत स्मात् कारणात्, प्रशान्त्युद्यम प्रकर्षेण शान्तेरुद्यम, न नैव यत्र सुख पिपासिते यत्राश्च सुख च यत्र सुखे तयो पिपासा-यशो मे स्यात् सुख च मे स्यादित्याकारिकेच्छा, तदाश्रयै, यश सुखकामुकैरित्यथ, अनर्थोत्तरै अनथमनिष्टमुत्तरकाले येषा तेऽनर्थोत्तरास्तै, उत्तरकालेऽवश्यमनिष्टप्राप्तिमद्भि, परै जैनभिन्नैर्जनै रागद्वेषाक्रान्तै, अयमसावपसद देवदत्तोऽय मम शत्रु रत्यन्तापकारकारी, असौ मम छिद्रान्वेषी इत्यादिस्वरूप आभास, यद्वा अपसद अधम अयमस्मौ सोऽयमभिमानज्वर, कुतोऽपि कस्मादपि देशकालादे, कथमपि केनापि प्रकारेण, अपाकृष्यते? दूरीक्रियते? काक्वा न कुतोऽपि न कथमप्यपाकर्तुं शक्यत इत्यथ ॥ १८ ॥

हे जिन! यथा त्वमुपदिशसि तथैव हितपरीक्षकैरुपेयत प्रकारान्तरस्य हित त्वाभावादित्याह—

न दु ख-सुखकल्पनामलिनमानस सिद्ध्यति,
न चागममदादरो न च पदार्थभक्तीश्वर ।
न शून्यघटितस्मृतिर्न शयनोदरस्थो न वा
यथात्थ न तत पर हितपरीक्षकैर्मन्यते ॥ २० ॥

न दु खसुखकल्पनेति। "सुख-दु खकल्पनामलिनमानसो न सिध्यति, आगममदादरो न च सिध्यति, पदार्थभक्तीश्वरो न च सिध्यति, शून्यघटित

स्मृति न सिध्यति, शयनोदरस्थो न सिध्यति, पर यथार्थ तत्र हितपरीक्षकैन मन्यते न वा" इत्यन्वय । सुख दु खकल्पनामलिनमानसः सुख च दु ख च सुख दु खे तयो कल्पना सुख दु खकल्पना, सुखदु खकल्पनया मलिनं मानस यस्य स सुख दु खकल्पनामलिनमानस , यमाद्यनुष्ठितौ मम स्वर्गादि सुखं भविष्यति अभक्ष्यभक्षणादिनिषिद्धाचरणे नरकादिदु खं भविष्यतीत्यादि कल्पनैकनिरतान्त करण पुरुष इत्यर्थ , न नैव, सिध्यति मुक्तो भवति, आगमसदादरः आगमे-जिनवचने, आप्तपरम्पराप्रणीतराद्धान्तसन्दोह च, सदा-सर्वदा आदर -बहुमानो यस्य स आगमसदादर , निरन्तरमागमाध्ययना ध्यापनैकदत्तचित्त इत्यर्थ न नैव, सिध्यतीत्यनुकर्षणीय पूर्ववद् व्याख्येयम्, पदार्थभक्तीश्वर एते पदार्था इत्थमुपपत्तिपद्धतिं यान्ति नान्यथत्येव या पदार्थोपपादनलक्षणा पदार्थभक्तिस्तया तस्या वा ईश्वर -लोकाग्र बुधमुक्तानो परीक्षकाणां मध्ये प्रधान -पदार्थभक्तीश्वर , न च नैव सिध्यतीत्यनुकर्षणीयम्, शून्यघटितस्मृति शून्येन शून्यलक्षणविषयेन, घटिता-युक्ता, स्मृति-स्मरणं यस्य स शून्यघटितस्मृति , सर्वदा निराकार ब्रह्म शून्य वा स्मरन् पुरुष , न नैव, सिध्यतीत्यर्थं , शयनोदरस्थ शयनस-सुषुप्ते , उदरे तदवस्थाक्रान्त समये, स्थित -शयनोदरस्थ , सर्वदा सुषुप्तिमेव परमं निर्वाणं मत्वा सेवमान न नैव, सिध्यतीत्यर्थ, पर केवल, ह भगवन्! त्वं यथा येन प्रकारेण, आत्थ कथयसि, तत तस्माद् भवत्कथितप्रकारात्, हितपरीक्षकै इदमेव हित नान्यन्न्येव परमतनिराकरणपूर्वकस्वमतव्यवस्थापनप्रगल्भै , न मन्यते हित न मननविषयीक्रियत इति, नवेत्यस्य निषेधमात्रार्थकत्वान्निषेधद्वयेन प्रकृतार्थदार्ढ्याद् हित मन्यत एवेति भवदुपदिष्टाचरणाचान्तात्त करण सिध्यतीत्यर्थ, अथवा हित इति पृथक्, हे हित! निखिलजन्तुहितकारक!, न वा इत्यत्र वाशब्द समुच्चयार्थ , नकारद्वयेन च प्रस्तुतार्थदार्ढ्य ज्ञेयम् । 'मन्यते' इति स्थाने 'गम्यते' इति पाठेऽपि गत्यर्थानां ज्ञानार्थत्वात् प्रागुक्त एवार्थ फलति ॥ २० ॥

उत्कृष्टास्तिकत्वादिधर्मवत्त्वेन सर्वोत्कृष्टतया भगवन्त स्तौति—

त्वमेव परमास्तिक परमशून्यवादी भवान्
त्वमुज्ज्वलविनिर्णयोऽप्यवचनीयवाद पुन ।

परस्परविरुद्धतत्त्वसमयश्च सुश्लिष्टवाक्
त्वमेव भगवन्नकम्प्यसुनयो यथा कस्तथा ॥ २१ ॥

त्वमेवेति । अन्वयो यथाश्रुतानुपात्येव, हे भगवन्! त्वमेव विशेष्यसङ्गतैव कारस्यान्ययोगव्यवच्छेदकार्थकत्वाज्जिनभिन्ने परमास्तिकत्वं व्यवच्छिद्यते, पर मास्तिक अस्ति स्वर्ग अस्ति नरकमित्येवं परलोकविशेष्यकास्तित्वप्रकारक निर्णयवान् आस्तिक, स च जैनाऽक्षपाद–कणाद–सांख्य मीमांसक–बौद्धभेदेन षोढा प्रसिद्ध, सांख्यस्य सेश्वराऽनीश्वरभेदेन द्विविधतया तत्रैवेश्वराभ्युपगन्तृ पातञ्जलेश्वरानभ्युपगन्तृकापिलयोरन्तर्भाव, मीमांसाया पूर्वोत्तरमीमांसाभेदेन द्विविधत्वेन तत्र कर्मकाण्डप्रधानपूर्वमीमांसामननप्रवणस्य जैमिनिमुन्यनुयायिनो मीमांसकस्य ज्ञानकाण्डप्रधानोत्तरमीमांसामननप्रवणस्य व्यासानुयायिनो वेदान्तिनश्च मीमांसकान्तर्भाव, एवं षण्णामास्तिकानां मध्ये धर्मास्तिकायादीनामप्यस्तितास्वीकारेणोत्कृष्टतमत्वात् परमास्तिकस्त्वमेव त्वदन्यावृत्तिपरमास्तिकत्ववान् त्वमित्यर्थ परमशून्यवादी ब्रह्मातिरिक्तं नास्तीत्येवं ब्रह्मातिरिक्तस्य शून्यत्वम्–अभाव ब्रुवन् ब्रह्माद्वैतवादी भवति शून्यवादी, सौत्रान्तिक–वैभाषिक–योगाचार माध्यमिकभेदेन चतुर्विधेषु बौद्धेषु बाह्यमाभ्यंतरं च किमपि वस्तु युक्त्या नोपपद्यत इति नास्तीत्येवं सर्वं शून्यं ब्रुवन् माध्यमिक शून्यवादी, सर्वं वस्तु स्वद्रव्यादिरूपेण सदपि परद्रव्यादिरूपेणासदेवेत्येवमसत्त्वलक्षणशून्यत्वमेव सर्वस्य वस्तुनोऽभिदधत् जिनो ऽपि शून्यवादी तेषु भवान् जिन एव परमशून्यवादी, त्व मिति, उज्ज्वलविनिर्णयोऽपि उज्ज्वल –अत्यन्तप्रकाशमानो विशेषेण निर्णयो यस्य स उज्ज्वलविनिर्णय, एवंस्वरूपोऽपि पुन तथा, अवचनीयवाद वच नीय –गर्हितो न भवतीत्यवचनीयोऽनिन्दित अथवा अवचनीय –गुणातिरेकतो वर्णयितुमशक्य, यद्वा स्यादवक्तव्य एव' इति भङ्गाकलित वाद राद्धान्तो यस्य सोऽवचनीयवाद, अनिन्दितपरमोच्चस्याद्वादराद्धान्त, त्वमेव, च पुन, परस्परविरुद्धतत्त्वसमय परस्पर विरुद्धानि–एकावच्छेदेनैकत्राधिकरणेऽवर्तमानानि, तत्त्वानि सत्त्वासत्त्वावक्तव्यत्वादीनि परस्परविरुद्धतत्त्वानि तेषां समय –एकत्र विभिन्नावच्छेदेन वृत्तिप्रतिपादक आगमो यस्य स परस्परविरुद्धसमय, त्वमेव, सुश्लिष्टवाक् सुश्लिष्टा –परस्पर सङ्गता, वाचो यस्य स सुश्लिष्टवाक्, अन्योन्यसङ्गतपूर्वापरीभावापन्नवाक्यवक्ता, त्वमेव जिन एव हे भगवन्! त्व यथा अकम्प्यसुनय अकम्प्या –बाधाद्युद्भावनेन परेण कम्पयितु–

स्वविषयात् प्रच्यावयितुमशक्या, सुनया –सद्धेतु-व्यवहारादयो यस्य स अकम्प्यसुनय, तथा अकम्प्यसमय, एव भवदन्य न कोऽपीत्यर्थ ॥ २१ ॥

भवदुपदिष्टागम तदर्थौ सुनयनिष्प्रकम्पावित्युपदर्शयति—

न किञ्चिदुपलक्ष्यते गगनकाष्ठयोरन्तर
न चापि न पृथक् तयोस्तदुपलक्षित लक्षणम् ।
न चास्ति नियमो दिशा न च हितोचितैषा स्थिति-
स्त्वदीयमिव शासन सुनयनिष्प्रकम्पा स्थिता ॥ २२ ॥

न किञ्चिदिति। गगन-काष्ठयो किञ्चिदन्तर नोपलक्ष्यते, तयोस्तदुपलक्षित लक्षण पृथक् नेति न चापि, दिशा नियमो न चास्ति, एषा स्थितिर्हितोचिता न च, त्वदीय शासनमिव सुनयनिष्प्रकम्पा स्थिता" इत्यन्वयः। गगन-काष्ठयो आकाश दिशो "दिशस्तु ककुभ काष्ठा" इति कोशात् काष्ठाशब्दो दिग्वाचक, किञ्चित् अण्वपि अन्तर भेदो विरुद्धधर्मवत्त्वलक्षण न नैव, उपलक्ष्यते उपलभ्यते, तत् किं तयोर्भेद एव नास्ति विभिन्न वा लक्षणं न समस्तीत्यत आह–तयो गगन दिशो, तदुपलक्षित लक्ष्यभेदोपलक्षित, लक्ष्यभेदे सति लक्षणभेद आवश्यक इति लक्षणस्य लक्ष्यभेदोपलक्षितत्व नियतम्, लक्षण विभिन्नव्यवहार लक्ष्येतरभेदान्यतरानुमापक लक्ष्यतावच्छेदकसमनियतधर्मवत्त्व रूप, पृथक् भिन्न, न नैव, इति न चापि निषेधद्वयस्य प्रकृतार्थावधारणपर्यवसितत्वेन भिन्नमेवेत्यर्थ, अयमस्मात् पूर्व अयमस्मात् पश्चिम इत्यादिव्यवहार कारण क्षेत्र पूर्वादिदिक्, एतादृशव्यवहारानपेक्ष क्षेत्रमाकाशमिति भिन्नलक्षण सत्त्वादित्यर्थ। दिशा वस्तुस्वरूपनिरूपणप्रकाराणाम्, नियम अयमेव नातोऽन्यथेति नास्ति, शिष्यादिबुद्धिवैशद्यार्थं कश्चिद् गुरुभूतोऽपि निरूपणप्रकार आदृतो भवति ग्रन्थगौरवपरिहारार्थं च कुत्रचिल्लघुभूतप्रकार एवोपदश्यते, मन्दमतिप्रबोधनाय कुत्रचिल्लक्षणस्यातिव्याप्त्यादिदोषापनयनमपि क्रियते इत्येवं दिशां नियमाभाव एव, एषा अनन्तरोपवर्णिता, स्थिति लक्ष्यलक्षणादिव्यवस्था, हितोचिता स्वस्वसमीहितानुसारिणी, न च नैव, लक्ष्यैकचक्षुषो हि शास्त्रकारा लक्ष्यानुरोध्येव लक्षण प्रणयन्ति, न तु हितानुसारीत्यभिसन्धि यद्वा दिशा पूर्वादिकाष्ठाना, नियम इयमेव प्राची, इयमेव प्रतीची, इयं प्राच्येव इय प्रतीच्येव

इत्यादिनियम , न नैव, एकापेक्षया प्राच्यपि परापेक्षया प्रतीची भवतीत्यर्थ । हे भगवन्! त्वदीय जिनोदित, शासनमिव श्रुतमिव, त्वदीय शासन यथा सुनयनिष्प्रकम्प तथा लक्ष्यलक्षणादिपदार्था , सुनयनिष्प्रकम्पा विषय विषयिणोरभेदोपचारात् सुनयाश्च ते निष्प्रकम्पा सुनयनिष्प्रकम्पा , सुनयनिरपवादेव बाधादिलक्षणकम्परहिता , अथवा सुनयो निष्प्रकम्पो येषु ते सुनयनिष्प्रकम्पा अबाधितसुनयविषया इत्यर्थ , स्थिता व्यवस्थिता ॥ २२ ॥

जिनस्य रागद्वेषमलाकलुषितराद्धान्तनिकषोपल सता पि परीक्षा परीक्ष्य तत्त्वनिर्णये समर्थयितेद् व्ययचयविषयपरीक्षोपवर्णनेन समर्थयति—

व्ययोऽपि पुनरुद्भवे भवति कर्मणा कारण
चयोऽपि च पर ललाम भवनिर्जराबोधने ।
करोति मलमर्जयन्नपि च निष्कृतिं कर्मणा
न वा क्व तव तीर्णसङ्गनिकषे परीक्षा क्षमा ॥ २३ ॥

व्ययोऽपीति । 'कर्मणा पुनरुद्भव कारणं व्ययोऽपि भवति, भवनिर्जरा बोधने चयोऽपि च पर ललाम, च—पुन मलमर्जयन्नपि कर्मणो निष्कृतिं करोति, हे जिन! तव तीर्णसङ्गनिकषे परीक्षा क्व वा न क्षमा' इत्यन्वय । कर्मणा ज्ञानावरणीयादिकर्मणा, पुनरुद्भवे पुनरुत्पत्तौ, आत्मप्रदेशै सम कर्मपुद्गलाना क्षीरनीरन्यायेन सम्बन्धने कारण निमित्त, व्ययोऽपि उपभोगेन पूर्वबद्ध कर्मणो विनाशो पि जीवप्रदेशेभ्यो पृथग्भवनलक्षण , भवति वैशेषिकमते च "कर्म कर्मसाध्य न विद्यते इति सूत्रत एकस्मिन् कर्मणि विद्यमाने तदधिकरण द्रव्य कर्मान्तर नोपजायत इति कर्मण कर्मप्रतिबन्धकत्वेन तद्ध्वसस्य प्रतिबन्धका भावविधया कर्मकारणत्वमिति एतावता व्ययस्य बन्धकारणत्व प्रतिपादितं भवति, भवनिर्जराबोधने भवस्य—ससारस्य, जीवप्रदेशसम्पृक्तकर्मणि सति ससार इति तत्क्षयतत्वाज्जीवप्रदेशसश्लिष्टकर्मण निर्जरा—निर्गरण जीवप्रदेशेभ्य पृथग् भवनं, तद्बोधने—तज्ज्ञापने, चयोऽपि कर्मपुद्गलसचयोऽपि, पर उत्कृष्ट, ललाम मनोहर स्पृहणीय वस्तु, पर स्पृहणीय इत्यर्थ , च पुन , मल कर्ममलम्, अर्जयन्नपि काय-वाङ्-मनोयोगै सञ्चिन्वन्नपि, कर्मणो निष्कृति विनाश, करोति उत्पादयति, एतावता चयस्येष्टत्वमर्थादावेदितम्, हे जिन! तव जिनस्य,

स्वविषयात् प्रच्यावयितुमशक्या, सुनया —सङ्ग्रह-व्यवहा-
रप्रसुनय, तथा अकम्प्यसमय, क मनदन्य "

भवदुपदिष्टागम वदर्थौ सुनयनिष्प्रकम्पानित्युपदश

न किञ्चिदुपलक्ष्यते गगनराष्ट्योरन्तर
न चापि न पृथक् तयोस्तदुपलक्षित लक्ष
न चास्ति नियमो दिशा न च हितोचितैषा ।
स्त्वदीयमिव शासन सुनयनिष्प्रम्पा स्थिता

न किञ्चिदिति। गगनकाष्ठयो किञ्चिदन्तर नोपलक्ष्यते, त-
ल्लक्षणं पृथक् नेति न चापि, दिशो नियमो न चास्ति, एषा स्थिति
च त्वदीय शासनमिव सुनयनिष्प्रकम्पा स्थिता " इत्यन्वय । गगन
आकाश दिशो, 'दिशस्तु ककुभ काष्ठा" इति कोशात् काष्ठाशब्दो दिग्
किञ्चित् अण्वपि, अन्तर भेदो विरुद्धधर्मवत्त्वरूपण, न नैव, उपल
उपलभ्यते, तत् किं तयोर्भेद एव नास्ति विभिन्न वा लक्षण न समस्ती
आह—तयो गगन दिशो, तदुपलक्षित लक्ष्यभेदोपलक्षित, लक्ष्यभेद स
लक्षणभेद आवश्यक इति लक्षणस्य लक्ष्यभेदोपलक्षितत्व नियतम्, लक्षण
विभिन्नव्यवहार लक्ष्येतरभेदान्यतरानुमापक लक्ष्यतावच्छेदकमनियतधर्मवत्त्व
रूप, पृथक् भिन्न, न नैव, इति न चापि निषेधद्वयस्य प्रकृतार्थावधारणपर-
मितत्वेन भिन्नमेवेत्यर्थ, 'अयमस्मात् पूर्व अयमस्मात् पश्चिम ' इत्यादिव्यवहार
कारण क्षेत्रं पूर्वादिदिक्, एतादृशव्यवहारानपेक्ष क्षेत्रमाकाशमिति भिन्नलक्षण
सत्त्वादित्यर्थ । दिशा वस्तुस्वरूपनिरूपणप्रकाराणाम् नियम अयमेव नातो
ऽन्यथेति नास्ति, शिष्यादिबुद्धिवैशद्यार्थं कश्चिद् गुरुभूतोऽपि निरूपणप्रकार
आन्तो भवति, ग्रन्थगौरवपरिहारार्थं च कुत्रचिल्लघुभूतप्रकार एवोपदर्श्यते, मन्द
